

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## षष्ठकाण्डे तृतीयः प्रश्नः

### सोममन्त्रब्राह्मणनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

चात्वालाद्धिष्णियानुप वपति योनिर् वै यज्ञस्य चात्वालयँय्यँज्ञस्य सयोनित्वाय देवा वै
यज्ञम्पराऽजयन्त तमाग्नीद्ध्रात् पुनरपाजयन्नेतद्वै यज्ञस्यापराजितयँय्यदाग्नीद्ध्रयँय्यदाग्नीद्ध्राद्
धिष्णियान्विहरति यदेव यज्ञस्यापराजितन्तत एवैनम्पुनस्तनुते पराजित्येव खलु वा एते यन्ति
ये बहिष्पवमानꣳ सर्पन्ति बहिष्पवमाने स्तुत ॥ [१] ॥ आहाग्नीदग्नीन्वि हर बर्हिः स्तृणाहि
पुरोडाशाꣳ अलङ्कुर्विति यज्ञमेवापजित्य पुनस्तन्वाना यन्त्यङ्गारैर् द्वे सवने वि हरति शलाका-
भिस्तृतीयꣳ सशुक्रत्वायाथो सम्भरत्येवैनद्धिष्णिया वा अमुष्मिँल्लोके सोममरक्षन् तेभ्योऽधि
सोममाऽहरन् तमन्ववायन् तम्पर्यविशन्य एवव्वेँद विन्दते ॥ [२] ॥ परिवेष्टारन्ते सौमपी-
थेन व्यार्द्ध्यन्त ते देवेषु सोमपीथमैच्छन्त तान् देवा अब्रुवन् द्वेद्वे नामनी कुरुद्ध्वमथ प्र
वाऽऽफ्स्यथ न वेत्यग्नयो वा अथ धिष्णियास्तस्माद् द्विनामा ब्राह्मणोऽर्द्धुकस्तेषायँय्ये नेदिष्ठम्पर्य-
विशन् ते सौमपीथम्प्राऽ*प्नुवन्नाहवनीय आग्नीद्ध्रीयो होत्रीयो मार्जालीयस्तस्मात् तेषु जुह्वत्य-
तिहाय वषट् करोति वि ह्ये ॥ [३] ॥ ते सौमपीथेनाऽऽर्ध्यन्त देवा वै याः प्राचीराहुतीरजुहवुर्
ये पुरस्तादसुरा आसन् ताꣳ स्ताभिः प्राणुदन्त याः प्रतीचीर् ये पश्चादसुरा आसन् ताꣳ स्ताभि-
रपानुदन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यङ्ङासीनो धिष्णियान् व्याघारयति पश्चाच्चैव पुरस्ताच्च
यजमानो भ्रातृव्यान् प्र णुदते तस्मात् पराचीः प्रजाः प्र वीयन्ते प्रतीचीर् ॥ [४] ॥ जायन्ते
प्राणा वा एते यद्धिष्णिया यदद्ध्वर्युः प्रत्यङ् धिष्णियानतिसर्पेत् प्राणान्थ् सङ्कर्षेत् प्रमायुकः

स्यान्नाभिर् वा एषा यज्ञस्य यद्धोतोर्द्ध्वः खलु वै नाभ्यै प्राणोऽवाङ्पानो यदद्ध्वर्युः प्रत्यङ्
होतारमतिसर्पेदपाने प्राणन्दध्यात् प्रमायुकः स्यान्नाद्ध्वर्युरुप गायेद् वाग्वीर्यो वा अद्ध्व-
र्युर्यदद्ध्वर्युरुपगायेदुद्गात्रे ॥ [५] ॥ वाचꣳ सम्प्र यच्छेदुपदासुकाऽस्य वाख् स्याद्ब्रह्मवादिनो
वदन्ति नासꣳस्थिते सोमेऽद्ध्वर्युः प्रत्यङ्क् सदोऽतीयादथ कथा दाख्षिणानि होतुमिति यामो
हि स तेषाङ्कस्मा अह देवा यामँव्वाऽयामँव्वाऽनु ज्ञास्यन्तीत्युत्तरेणाऽऽग्नीद्ध्रम्परीत्य जुहोति
दाख्षिणानि न प्राणान्थ् सङ्कर्षति न्यन्ये धिष्णिया उप्यन्ते नान्ये यान् निवपति तेन तान्
प्रीणाति यान् न निवपति यदनुदिशति तेन तान् ॥ [६] ॥

(स्तुते विन्दते हि वीयन्ते प्रतीचीं रुद्गात्र उप्यन्ते चतुर्दश च) ॥ १ ॥

सुवर्गाय वा एतानि लोकाय हूयन्ते यद् वैसर्जनानि द्वाभ्याङ्गार्हपत्ये जुहोति द्विपाद् यज-
मानः प्रतिष्ठित्या आग्नीद्ध्रे जुहोत्यन्तरिख्ष एवाऽऽक्रमत आहवनीये जुहोति सुवर्गमेवैनँल्लो-
कङ्गमयति देवान्वै सुवर्गँल्लोकँय्यतो रख्षाꣳस्यजिघाꣳसन् ते सोमेन राज्ञा रख्षाꣳस्यपहत्याप्तु-
मात्मानङ्कृत्वा सुवर्गँल्लोकमायन् रख्षसामनुपलाभायाऽऽत्तः सोमो भवत्यथ ॥ [७] ॥ वैस-
र्जनानि जुहोति रख्षसामपहत्यै त्वꣳ सोम तनूकृद्भ्य इत्याह तनूकृद्ध्येष द्वेषोभ्योऽन्यकृतेभ्य
इत्याहान्यकृतानि हि रख्षाꣳस्युरु यन्ताऽसि वरूथमित्याहोरु णः स्कृधीति वावैतदाह जुषाणो
अप्तुराज्यस्य वेत्वित्याहाप्तुमेव यजमानङ्कृत्वा सुवर्गँल्लोकङ्गमयति रख्षसामनुपलाभायाऽऽसो-
मन्ददत ॥ [८] ॥ आ ग्राव्ण आ वायव्यान्या द्रोणकलशमुत् पत्नीमा नयन्त्यन्वनाꣳसि
प्र वर्तयन्ति यावदेवास्यास्ति तेन सह सुवर्गँल्लोकमेति नयवत्यर्चाऽऽग्नीद्ध्रे जुहोति सुवर्गस्य
लोकस्याभिनीत्यै ग्राव्णो वायव्यानि द्रोणकलशमाग्नीद्ध्र उप वासयति वि ह्येनन्तैर् गृह्णते यथ्
सहोपवासयेदपुवायेत सौम्यर्चा प्र पादयति स्वयै ॥ [९] ॥ वैनन्देवतया प्र पादयत्यदित्याः
सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेवैतद्यजमानो वा एतस्य पुरा गोप्ता भवत्येष वो देव
सवितः सोम इत्याह सवितृप्रसूत एवैनन्देवताभ्यः सम्प्र यच्छत्येतत् त्वꣳ सोम देवो देवानुपागा
इत्याह देवो ह्येष सन् ॥ [१०] ॥ देवानुपैतीदमहम्मनुष्यो मनुष्यानित्याह मनुष्यो(१) ह्येष सन्
मनुष्यानुपैति यदेतद् यजुर्न ब्रूयादप्रजा अपशुर्यजमानः स्याथ् सह प्रजया सह रायस्पोषेणेत्याह

प्रजयैव पशुभिः सहेमल्लोँकमुपावर्तते नमो देवेभ्य इत्याह नमस्कारो हि देवानाꣳ स्वधा पितृभ्य इत्याह स्वधाकारो हि ॥ [११] ॥ पितृणामिदमहन्निर् वरुणस्य पाशादित्याह वरुणपाशादेव निर् मुच्यतेऽग्ने व्रतपत आत्मनः पूर्वा तनूरादेयेत्याहुः को हि तद्वेद यद् वसीयान्थ् स्वे वशे भूते पुनर् वा ददाति न वति ग्रावाणो वै सोमस्य राज्ञो मलिम्लुसेना य एवव्ँविद्वान् ग्रावण्ण आग्नीद्ध्र उपवासयति नैनम्मलिम्लुसेना विन्दति ॥ [१२] ॥

(अथ ददते स्वया सन्थ् स्वधाकारो हि विन्दति) ॥ २ ॥

---

वैष्णव्यर्चा हुत्वा यूपमच्छैति वैष्णवो वै देवतया यूपः स्वयैवैनन्देवतयाऽच्छैत्यत्यन्या-नगान्नान्यानुपागामित्याहाति ह्यन्यानेति नान्यानुपैत्यर्वाक् त्वा परैरविदम्परोऽवरैरित्याहार्वा-ग्घ्येनम्परैर् विन्दति परोऽवरैस्तन्त्वा जुषे ॥ [१३] ॥ वैष्णवन्देवयज्याया इत्याह देवयज्यायै ह्येनञ्जुषते देवस्त्वा सविता मद्ध्वाऽनक्त्वित्याह तेजसैवैनमनक्त्योषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीरित्याह वज्रो वै स्वधितिः शान्त्यै स्वधितेर् वृक्षस्य बिभ्यतः प्रथमेन शकलेन सह तेजः परा पतति यः प्रथमः शकलः परापतेत् तमप्या हरेथ् सतेजस ॥ [१४] ॥ मेवैनमा हरतीमे वै लोका यूपात् प्रयतो बिभ्यति दिवमग्रेण मा लेखीरन्तरिक्षम्मद्ध्येन मा हिꣳसीरित्याहैभ्य एवैनल्लोँकेभ्यः शमयति वनस्पते शतवल्शो वि रोहेत्याव्रश्चने जुहोति तस्मादाव्रश्चनाद्वृक्षा-णाम्भूयाꣳस उत् तिष्ठन्ति सहस्रवल्शा वि वयꣳ रुहेमेत्याहाऽऽ*शिषमेवैतामा शास्तेऽन-क्षसङ्ग ॥ [१५] ॥ व्वृँश्चेद्यदक्षसङ्गव्वृँश्चेदधीषय्यँजमानस्य प्रमायुकꣳ स्याद्यङ्कामयेताप्रति-ष्ठितः स्यादित्यारोहन्तस्मै वृश्चेदेष वै वनस्पतीनामप्रतिष्ठितोऽप्रतिष्ठित एव भवति यङ्कामयेता-पशुः स्यादित्यपर्णन्तस्मै शुष्काग्रव्वृँश्चेदेष वै वनस्पतीनामपशव्योऽपशुरेव भवति यङ्कामयेत पशुमान्थ् स्यादिति बहुपर्णन्तस्मै बहुशाखव्वृँश्चेदेष वै ॥ [१६] ॥ वनस्पतीनाम्पशव्यः पशु-मानेव भवति प्रतिष्ठितव्वृँश्चेत् प्रतिष्ठाकामस्यैष वै वनस्पतीनां प्रतिष्ठितो यः समे भूम्यै स्वाद्योने रूढः प्रत्येव तिष्ठति यः प्रत्यङ्ङुपनतस्तव्वृँश्चेथ् स हि मेधमभ्युपनतः पञ्चारत्निन्तस्मै वृश्चेद्य-ङ्कामयेतोपैनमुत्तरो यज्ञो नमेदिति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञ उपैनमुत्तरो यज्ञो ॥ [१७] ॥ नमति षडरत्निम्प्रतिष्ठाकामस्य षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठति सप्तारत्निम्पशुकामस्य सप्तपदा

शक्करी पशवः शक्करी पशूनेवाव रुन्धे नवारत्निन्तेजस्कामस्य त्रिवृता स्तोमेन सम्मितन्तेजस्त्रिवृत् तेजस्व्येव भवत्येकादशारत्निमिन्द्रियकामस्यैकादशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदशारत्निम्भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्तदशारत्निम्प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या एकविꣳशत्यरत्निम्प्रतिष्ठाकामस्यैकविꣳशः स्तोमानाम्प्रतिष्ठा प्रतिष्ठित्या अष्टाश्रिर् भवत्यष्टाक्षरा गायत्री तेजो गायत्री गायत्री यज्ञमुखन्तेजसैव गायत्रिया यज्ञमुखेन सम्मितः ॥ [१८] ॥

(जुषे सतेजस मनक्षसङ्गं बहुशाखवँृश्चेद्देष वै यज्ञ उपैनमुत्तरो यज्ञ आप्त्या एकान्नविंꣳशतिश्च) ॥ ३ ॥

पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वेत्याहैभ्य एवैनँल्लोकेभ्यः प्रोक्षति पराञ्चम्प्रोक्षति पराङिव हि सुवर्गो लोकः क्रूरमिव वा एतत् करोति यत् खनत्यपोऽव नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यवो यजमानेन यूपः सम्मितो यावानेव यजमानस्तावतीमेवास्मिन्नूर्जन्दधाति ॥ [१९] ॥ पितृणाꣳ सदनमसीति बर्हिरव स्तृणाति पितृदेवत्याँ(१)ꣳ ह्येतद्यन्निखातँय्यद्बर्हिरनवस्तीर्य मिनुयात् पितृदेवत्यो निखातः स्याद् बर्हिरवस्तीर्य मिनोत्यस्यामेवैनम्मिनोति यूपशकलमवास्यति सतेजसमेवैनम्मिनोति देवस्त्वा सविता मद्ध्वाऽनक्त्वित्याह तेजसैवैनमनक्ति सुपिप्पलाभ्यस्त्वौषधीभ्य इति चषालम्प्रति ॥ [२०] ॥ मुञ्चति तस्माच्छीर्षत ओषधयः फलङ्गृह्णन्त्यनक्ति तेजो वा आज्यँय्यजमानेनाग्निष्ठाऽश्रिः सम्मिता यदग्निष्ठामश्रिमनक्ति यजमानमेव तेजसाऽनक्त्यान्तमनक्त्यान्तमेव यजमानन्तेजसाऽनक्ति सर्वतः परि मृशत्यपरिवर्गमेवास्मिन् तेजो दधात्युद् दिवꣳ स्तभानाऽन्तरिक्षम्पृणेत्याहैषाँल्लोकानाँव्विधृत्यै वैष्णव्यर्चा ॥ [२१] ॥ कल्पयति वैष्णवो वै देवतया यूपः स्वयैवैनन्देवतया कल्पयति द्वाभ्याङ्कल्पयति द्विपाद् यजमानः प्रतिष्ठित्यै यङ्कामयेत तेजसैनन्देवताभिरिन्द्रियेण व्यर्द्धयेयमित्यग्निष्ठान्तस्याश्रिमाहवनीयादित्थँव्वेत्थँव्वाऽति नावयेत् तेजसैवैनन्देवताभिरिन्द्रियेण व्यर्द्धयति यङ्कामयेत तेजसैनन्देवताभिरिन्द्रियेण समर्द्धयेयमित्य ॥ [२२] ॥ ग्निष्ठान्तस्याश्रिमाहवनीयेन सम्मिनुयात् तेजसैवैनन्देवताभिरिन्द्रियेण समर्द्धयति ब्रह्मवनिन्त्वा क्षत्रवनिमित्याह यथायजुरेवैतत् परि व्ययत्यूर्ग्वै रशना यजमानेन यूपः सम्मितो यजमानमेवोर्जा समर्द्धयति

नाभिदघ्ने परि व्ययति नाभिदघ्न एवास्मा ऊर्जन्दधाति तस्मान्नाभिदघ्न ऊर्जा भुञ्जते यङ्काम-येतोर्जैन ॥ [२३] ॥ वृँव्यर्द्धयेयमित्यूद्ध्र्वाँव्वा तस्यावाचीँव्वाऽवोहेदूर्जैवेनव्वँयर्द्धयति यदि कामयेत वर्षुकः पर्जन्यः स्यादित्यवाचीमवोहेद् वृष्टिमेव नि यच्छति यदि कामयेतावर्षुकः स्यादित्यूद्ध्र्वामुदूहेद् वृष्टिमेवोद् यच्छति पितृणान्निखातम्मनुष्याणामूद्ध्र्वन्निखातादा रशनाया ओषधीनाꣳ रशना विश्वेषां ॥ [२४] ॥ देवानामूद्ध्र्वꣳ रशनाया आ चषालादिन्द्रस्य चषालꣳ साद्ध्यानामतिरिक्तꣳ स वा एष सर्वदेवत्यो यद्यूपो यद्यूपम्मिनोति सर्वा एव देवताः प्रीणाति यज्ञेन वै देवाः सुवर्गँल्लोकमायन् तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति ते यूपेन योपयित्वा सुवर्गँल्लोकमायन् तमृषयो यूपेनैवानु प्राजानन् तद् यूपस्य यूपत्व ॥ [२५] ॥ य्यँद् यूपम्मि-नोति सुवर्गस्य लोकस्य प्रज्ञात्यै पुरस्तान् मिनोति पुरस्ताद्धि यज्ञस्य प्रज्ञायतेऽप्रज्ञातꣳ हि तद् यदतिपन्न आहुरिदङ्कार्यमासीदिति साद्ध्या वै देवा यज्ञमत्यमन्यन्त तान्यज्ञो नास्पृशत् तान्यद् यज्ञस्यातिरिक्तमासीत् तदस्पृशदतिरिक्तँव्वा एतद् यज्ञस्य यदग्नावग्निम्मथित्वा प्रहर-त्यतिरिक्तमेतद् ॥ [२६] ॥ यूपस्य यदूद्ध्र्वञ्चषालात् तेषान्तद् भागधेयन्तानेव तेन प्रीणाति देवा वै सꣳस्थिते सोमे प्र स्रुचोऽहरन् प्र यूपन्तेऽमन्यन्त यज्ञवेशसँव्वा इदङ्कुर्म इति ते प्रस्तरꣳ स्रुचान्निष्क्रयणमपश्यन्थ् स्वरुँय्यूपस्य सꣳस्थिते सोमे प्र प्रस्तरꣳ हरति जुहोति स्वरुमयज्ञवे-शसाय ॥ [२७] ॥

(द्विचत्वारिꣳशच्च) ॥ ४ ॥

---

साद्ध्या वै देवा अस्मिन् लोक आसन् नान्यत् किञ्चन मिषत् तेऽग्निमेवाग्नये मेधायाऽल-भन्त न ह्यन्यदालभ्यमविन्दन् ततो वा इमाः प्रजाः प्राजायन्त यदग्नावग्निम्मथित्वा प्रह-रति प्रजानां प्रजननाय रुद्रो वा एष यदग्निर्यजमानः पशुर्यत् पशुमालभ्याग्निम्मन्थेद् रुद्राय यजमान ॥ [२८] ॥ मपि दद्ध्यात् प्रमायुकः स्यादथो खल्वाहुरग्निः सर्वा देवता हविरे-तद्यत् पशुरिति यत् पशुमालभ्याग्निम्मन्थति हव्यायैवाऽऽसन्नाय सर्वा देवता जनयत्युपाकृ-त्यैव मन्थ्यस्तन्नेवाऽऽलब्धन्नेवानालब्धमग्नेर्जनित्रमसीत्याहाग्नेर् ह्येतज्जनित्रँव्वृषणौ स्थ इत्याह वृषणौ ॥ [२९] ॥ ह्येतावुर्वश्यस्यायुरसीत्याह मिथुनत्वाय घृतेनाक्ते वृषणन्दधाथामित्याह

वृषणꣳ ह्येते दधाते ये अग्निञ्जायत्रञ्छन्दोऽनु प्र जायस्वेत्याह छन्दोभिरेवैनम्प्र जनयत्य-ग्नये मथ्यमानायानु ब्रूहीत्याह सावित्रीमृचमन्वाह सवितृप्रसूत एवैनम्मन्थति जातायानु ब्रूहि ॥ [३०] ॥ प्रह्रियमाणायानु ब्रूहीत्याह काण्डेकाण्ड एवैनङ्क्रियमाणे समर्द्धयति गायत्रीः सर्वा अन्वाह गायत्रछन्दा वा अग्निः स्वेनैवैनञ्छन्दसा समर्द्धयत्यग्निः पुरा भवत्यग्निम्मथित्वा प्र हरति तौ संभवन्तौ यजमानमभि सम्भवतो भवतन्नः समनसावित्याह शान्त्यै प्रहृत्य जुहोति जातायैवास्मा अन्नमपि दधात्याज्येन जुहोत्येतद्वा अग्नेः प्रियन्धाम यदाज्यम्प्रियेणैवैनन्धाम्ना समर्द्धयत्यथो तेजसा ॥ [३१] ॥

(यजमानमाह वृषणौजातायानु ब्रूह्यप्युष्टादश च) ॥ ५ ॥

---

इषे त्वेति बर्हिरा दत्त इच्छत इव ह्येष यो यजत उपवीरसीत्याहोप ह्येनानाकरोत्युपो देवान् दैवीर्विशः प्रागुरित्याह दैवीर् ह्येता विशः सतीर् देवानुपयन्ति वह्नीरुशिज इत्याहर्त्विजो वै वह्नय उशिजस्तस्मादेवमाह बृहस्पते धारया वसूनीत्या ॥ [३२] ॥ ह ब्रह्म वै देवाना-म्बृहस्पतिर् ब्रह्मणैवास्मै पशूनव रुन्धे हव्या ते स्वदन्तामित्याह स्वदयत्येवैनान् देव त्वष्ट-र्वसु रण्वेत्याह त्वष्टा वै पशूनाम्मिथुनानाꣳ रूपकृद् रूपमेव पशुषु दधाति रेवती रमद्ध्व-मित्याह पशवो वै रेवतीः पशूनेवास्मै रमयति देवस्य त्वा सवितुः प्रसव इति ॥ [३३] ॥ रशनामा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामद्ध्वर्यू आस्ताम्पूष्णो हस्ता-भ्यामित्याह यत्या ऋतस्य त्वा देवहविः पाशेनाऽऽरभ इत्याह सत्यवैं वा ऋतꣳ सत्येनैवैनमृ-तेनाऽऽरभतेऽक्ष्णया परि हरति वद्ध्यꣳ हि प्रत्यञ्चम्प्रतिमुञ्चन्ति व्यावृत्त्यै धर्षा मानुषानिति नि युनक्ति धृत्या अद्भ्य ॥ [३४] ॥ स्त्वौषधीभ्यः प्रोक्षामीत्याहाद्भ्यो ह्येष ओषधीभ्यः संभ-वति यत् पशुरपाम्पेरुरसीत्याहैष ह्यपाम्पाता यो मेधायाऽऽरभ्यते स्वात्तञ्चिथ् सदेवꣳ हव्यमापो देवीः स्वदतैनमित्याह स्वदयत्येवैनमुपरिष्टात् प्रोक्षत्युपरिष्टादेवैनम्मेद्ध्यङ्करोति पाययत्यन्त-रत एवैनं मेद्ध्यङ्करोत्यधस्तादुपोक्षति सर्वत एवैनम्मेद्ध्यङ्करोति ॥ [३५] ॥

(वसूनीति प्रसव इत्यद्भ्यो ऽन्तरत एवैनं दश च) ॥ ६ ॥

---

अग्निना वै होत्रा देवा असुरानभ्यभवन्नग्नये समिध्यमानायानु ब्रूहीत्याह भ्रातृव्याभिभूत्यै सप्तदश सामिधेनीरन्वाह सप्तदशः प्रजापतिः प्रजापतेराप्त्यै सप्तदशान्वाह द्वादश मासाः पञ्च-र्तवः स संवँथ्सरः संवँथ्सरम्प्रजा अनु प्र जायन्ते प्रजानाम्प्रजननाय देवा वै सामिधेनी-रनूच्य यज्ञन्नान्वपश्यन्थ् स प्रजापतिस्तूष्णीमाघार ॥ [३६] ॥ माऽघारयत् ततो वै देवा यज्ञमन्वपश्यन्यत् तूष्णीमाघारमाघारयति यज्ञस्यानुख्यात्या असुरेषु वै यज्ञ आसीत् तन्देवा स्तूँष्णीꣳहोमेनावृञ्जत यत् तूष्णीमाघारमाघारयति भ्रातृव्यस्यैव तद् यज्ञँव्वृंक्ते परिधीन्थ् सम्माँर्ष्टि पुनात्येवैनान् त्रिस्त्रिः सम्माँर्ष्टि त्र्यावृद्धि यज्ञोऽथो रख्षसामपहत्यै द्वादश सम्पद्यन्ते द्वादश ॥ [३७] ॥ मासाः संवँथ्सरः संवँथ्सरमेव प्रीणात्यथो संवँथ्सरमेवास्मा उप दधाति सुव-र्गस्य लोकस्य समष्ट्यै शिरो वा एतद् यज्ञस्य यदाघारोऽग्निः सर्वा देवता यदाघारमाघारयति शीर्षत एव यज्ञस्य यजमानः सर्वा देवता अव रुन्धे शिरो वा एतद् यज्ञस्य यदाघार आत्मा पशुराघार माघार्य पशुꣳ समनक्त्यात्मन्नेव यज्ञस्य ॥ [३८] ॥ शिरः प्रति दधाति सन्ते प्राणो वायुना गच्छतामित्याह वायुदेवत्यो वै प्राणो वायावे वास्य प्राणञ्जुहोति सय्यँजत्रैरङ्गानि सय्यँज्ञ-पतिराशिषेत्याह यज्ञपतिमेवास्याऽऽशिषङ्गमयति विश्वरूपो वै त्वाष्ट्र उपरिष्टात् पशुमभ्यवमीत् तस्मादुपरिष्टात् पशोर् नाव द्यन्ति यदुपरिष्टात् पशुꣳ समनक्ति मेध्यमेवै ॥ [३९] ॥ नङ्क-रोत्यृत्विजो वृणीते छन्दाꣳस्येव वृणीते सप्त वृणीते सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्या एकादश प्रयाजान्यजति दश वै पशोः प्राणा आत्मैकादशो यावा-नेव पशुस्तम्प्र यजति वपामेकः परि शय आत्मैवाऽऽत्मानम्परि शये वज्रो वै स्वधितिर् वज्रो यूपशकलो घृतं खलु वै देवा वज्रङ्कृत्वा सोममघ्नन् घृतेनाक्तौ पशुन्त्रायेथामित्याह वज्रेणैवैनव्वँशे कृत्वाऽऽलभते ॥ [४०] ॥

(आघारं पद्यन्ते द्वादशा त्मन्नेव यज्ञस्यमेद्ध्यमेवखलु वा अष्टादश च) ॥ ७ ॥

पर्यग्नि करोति सर्वहुतमेवैनङ्करोत्यस्कन्दाया स्कन्नꣳ हि तद् यद् धुतस्य स्कन्दति त्रिः पर्यग्नि करोति त्र्यावृद्धि यज्ञोऽथो रख्षसामपहत्यै ब्रह्मवादिनो वदन्त्यन्वारभ्यः पशू(३)र् नान्वा-रभ्या(३) इति मृत्यवे वा एष नीयते यत् पशुस्तय्यँदन्वारभेत प्रमायुको यजमानः स्यादथो

खल्वाहुः सुवर्गाय वा एष लोकाय नीयते यत् ॥ [४१] ॥ पशुरिति यन्नान्वारभेत सुवर्गा-ल्लोकाद् यजमानो हीयेत वपाश्रपणीभ्यामन्वारभते तन्नेवान्वारब्धन्नेवानन्वारब्धमुप प्रेष्य होत-र्हव्या देवेभ्य इत्याहेषितꣳ हि कर्म क्रियते रेवतीर् यज्ञपतिम्प्रियधाऽऽविशतेत्याह यथायजुरेवै-तदग्निना पुरस्तादेति रक्षसामपहत्यै पृथिव्याः संपृचः पाहीति बर्हि ॥ [४२] ॥ रुपास्यत्य-स्कन्दायास्कन्नꣳ हि तद् यद् बर्हिषि स्कन्दत्यथो बर्हिषदमेवैनङ्करोति पराङा वर्ततेऽद्ध्वर्युः पशोः संज्ञप्यमानात् पशुभ्य एव तन्नि ह्नुत आत्मनोऽनाव्रस्काय गच्छति श्रियम्प्र पशूनाप्नोति य एवव्वँद पश्चाल्लोका वा एषा प्राच्युदानीयते यत् पत्नी नमस्त आतानेत्याहाऽऽदित्यस्य वै रश्मय ॥ [४३] ॥ आतानास्तेभ्य एव नमस्करोत्यनर्वा प्रेहीत्याह भ्रातृव्यो वा अर्वा भ्रातृ-व्यापनुत्त्यै घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेणेत्याहाऽऽशिषमेवैतामा शास्त आपो देवीः शुद्धायुव इत्याह यथायजुरेवैतत् ॥ [४४] ॥

(लोकाय नीयते यद् बर्ही रश्मयः सप्तत्रिꣳशच्च) ॥ ८ ॥

पशोर्वा आलब्धस्य प्राणाञ्छुगृच्छति वाक् त आ प्यायताम्प्राणस्त आ प्यायतामित्याह प्राणेभ्य एवास्य शुचꣳ शमयति सा प्राणेभ्योऽधि पृथिवीꣳ शुक् प्र विशति शमहोभ्यामिति नि नयत्यहोरात्राभ्यामेव पृथिव्यै शुचꣳ शमयत्योषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीरित्याह वज्रो वै स्वधितिः ॥ [४५] ॥ शान्त्यै पार्श्वत आ च्छ्यति मद्ध्यतो हि मनुष्या आच्छ्यन्ति तिरश्चीनमा च्छ्यत्यनूचीनꣳ हि मनुष्या आच्छ्यन्ति व्यावृत्त्यै रक्षसाम्भागोऽसीति स्थविमतो बर्हिरक्त्वाऽपास्यत्यस्नैव रक्षाꣳसि निरवदयत इदमहꣳ रक्षोऽधमन्तमो नयामि योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्म इत्याह द्वौ वाव पुरुषौ यञ्चैव ॥ [४६] ॥ द्वेष्टि यश्चैनन्द्वेष्टि तावुभावधम-न्तमो नयतीषे त्वेति वपामुत् खिदतीच्छत इव ह्येष यो यजते यदुपतृन्द्याद्रुद्रोऽस्य पशून् घातुकः स्याद् यन्नोपतृन्द्यादयता स्यादन्ययोपतृणत्त्यन्यया न धृत्यै घृतेन द्यावापृथिवी प्रोर्णुवाथामि-त्याह द्यावापृथिवी एव रसेनानक्त्यच्छिन्नो ॥ [४७] ॥ रायः सुवीर इत्याह यथायजुरेवैतत् क्रूरमिव वा एतत् करोति यद् वपामुत्खिदत्युर्वन्तरिक्ष मन्विहीत्याह शान्त्यै प्र वा एषोऽस्मा-ल्लोकाच्च्यवते यः पशुम्मृत्यवे नीयमानमन्वारभते वपाश्रपणी पुनरन्वारभतेऽस्मिन्नेव लोके प्रति

तिष्ठत्यग्निना पुरस्तादेति रख्षसामपहत्या अथो देवता एव हव्येना ॥ [४८] ॥ न्वेति नान्तम-
मङ्गारमति हरेद् यदन्तममङ्गारमतिहरेद्देवता अति मन्येत वायो वीहि स्तोकानामित्याह तस्माद्
विभक्ताः स्तोका अव पद्यन्तेऽग्रँव्वा एतत् पशूनाँय्यद् वपा ऽग्रमोषधीनाम्बर्हिरग्रेणैवाग्रꣳ सम-
र्द्धयत्यथो ओषधीष्वेव पशून् प्रति ष्ठापयति स्वाहाकृतीभ्यः प्रेष्येत्याह ॥ [४९] ॥ यज्ञस्य
समिध्यै प्राणापानौ वा एतौ पशूनाँय्यत् पृषदाज्यमात्मा वपा पृषदाज्यमभिघार्य वपामभि घार-
यत्यात्मन्नेव पशूनाम्प्राणापानौ दधाति स्वाहोदूर्ध्वनभसम्मारुतङ्गच्छतमित्याहोदूर्ध्वनभा ह स्म
वै मारुतो देवानाँव्वपाश्रपणी प्र हरति तेनैवैने प्र हरति विषूची प्र हरति तस्माद् विष्वञ्चौ प्राणा-
पानौ ॥ [५०] ॥

(स्वधिति श्रैवा च्छिन्नो हव्येने ष्येत्याह षड्चत्वारिꣳशच्च) ॥ ९ ॥

पशुमालभ्य पुरोडाशन्निर् वपति समेधमेवैनमा लभते वपया प्रचर्य पुरोडाशेन प्र चरत्यूर्ग् वै
पुरोडाश ऊर्जमेव पशूनाम्मद्ध्यतो दधात्यथो पशोरेव छिद्रमपि दधाति पृषदाज्यस्योपहत्य त्रिः
पृच्छति शृतꣳ हवी(३)ः शमितरिति त्रिषत्या हि देवा योऽशृतꣳ शृतमाह स एनसा प्राणापानौ
वा एतौ पशूना ॥ [५१] ॥ य्यत् पृषदाज्यम्पशोः खलु वा आलब्धस्य हृदयमात्माऽभि समेति
यत् पृषदाज्येन हृदयमभिघारयत्यात्मन्नेव पशूनाम्प्राणापानौ दधाति पशुना वै देवाः सुवर्ग-
ल्लोँकमायन् तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति तस्य शिरः छित्त्वा मेधम्प्राख्षारयन्थ् स
प्रख्षोऽभवत् तत् प्रख्षस्य प्रख्षत्वय्यँत् प्लख्षशाखोत्तरबर्हिर् भवति समेधस्यैव ॥ [५२] ॥
पशोरव द्यति पशुँव्वै ह्रियमाणꣳ रख्षाꣳस्यनु सचन्तेऽन्तरा यूपञ्चाऽऽहवनीयञ्च हरति रख्ष-
सामपहत्यै पशोर् वा आलब्धस्य मनोऽप क्रामति मनोतायै हविषोऽवदीयमानस्यानु ब्रूहीत्याह
मन एवास्याव रुन्ध एकादशावदानान्यव द्यति दश वै पशोः प्राणा आत्मैकादशो यावानेव
पशुस्तस्याव ॥ [५३] ॥ द्यति हृदयस्याग्रेऽव द्यत्यथ जिह्वाया अथ वख्षसो यद्वै हृदयेना-
भिगच्छति तज्जिह्वया वदति यज्जिह्वया वदति तदुरसोऽधि निर् वदत्येतद्वै पशोर् यथापूर्वय्यँ-
स्यैवमवदाय यथाकाममुत्तरेषामवद्यति यथा पूर्वमेवास्य पशोरवत्तम्भवति मद्ध्यतो गुदस्याव
द्यति मद्ध्यतो हि प्राण उत्तमस्याव द्यत्यु ॥ [५४] ॥ त्तमो हि प्राणो यदीतरय्यँदीतरमुभय-

मेवाजामि जायमानो वै ब्राह्मणस्त्रिभिरृणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी तदवदानैरेवाव दयते तदवदानानामवदान-त्वन्देवासुराः सय्यँत्ता आसन् ते देवा अग्निमब्रुवन् त्वया वीरेणासुरानभि भवामेति ॥ [५५] ॥ सोऽब्रवीद् वरँवृणै पशोरुद्धारमुद्धरा इति स एतमुद्धारमुदहरत दोः पूर्वार्द्धस्य गुदं मद्ध्यतः श्रोणिञ्जघनार्द्धस्य ततो देवा अभवन् पराऽसुरा यत् त्र्यङ्गाणाꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यक्ष्णयाऽव द्यति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै ॥ [५६] ॥

(एतौ पशूनाꣳ समेधस्यैव तस्याऽवौ त्तमस्याव द्यती ति पञ्चचत्वारिꣳशच्च) ॥ १० ॥

---

मेदसा स्रुचौ प्रोर्णोति मेदोरूपा वै पशवो रूपमेव पशुषु दधाति यूषन्नवधाय प्रोर्णोति रसो वा एष पशूनाय्यँद्यू रसमेव पशुषु दधाति पार्श्वेन वसाहोमम्प्र यौति मद्ध्यँवा एतत् पशूनाय्यँत् पार्श्वꣳ रस एष पशूनाय्यँद्वसा यत् पार्श्वेन वसाहोमम्प्रयौति मद्ध्यत एव पशूनाꣳ रसन्दधाति घ्नन्ति ॥ [५७] ॥ वा एतत् पशुय्यँथ् सञ्ज्ञपयन्त्यैन्द्रः खलु वै देवतया प्राण ऐन्द्रोऽपान ऐन्द्रः प्राणो अङ्गेअङ्गे नि देद्ध्यदित्याह प्राणापानावेव पशुषु दधाति देव त्वष्टर् भूरि ते सꣳसमेत्वि-त्याह त्वाष्ट्रा हि देवतया पशवो विषुरूपा यथ् सलक्ष्माणो भवथेत्याह विषुरूपा ह्येते सन्तः सलक्ष्माण एतर्हि भवन्ति देवत्रा यन्त ॥ [५८] ॥ मवसे सखायोऽनु त्वा माता पितरो मदन्त्वित्याहा नुमतमेवैनम्मात्रा पित्रा सुवर्गँल्लोकङ्गमयत्यर्द्धर्चे वसाहोमञ्जुहोत्यसौ वा अर्द्धर्च इयमर्द्धर्च इमे एव रसेनानक्ति दिशो जुहोति दिश एव रसेनानक्त्यथो दिग्भ्य एवोर्जꣳ रस-मव रुन्धे प्राणापानौ वा एतौ पशूनाय्यँत् पृषदाज्यँवानस्पत्याः खलु ॥ [५९] ॥ वै देव-तया पशवो यत् पृषदाज्यस्योपहत्याऽऽह वनस्पतयेऽनु ब्रूहि वनस्पतये प्रेष्येति प्राणापाना-वेव पशुषु दधात्यन्यस्यान्यस्य समवत्तꣳ समवद्यति तस्मान्नानारूपाः पशवो यूष्णोप सिञ्चति रसो वा एष पशूनाय्यँद्यू रसमेव पशुषु दधातीडामुप ह्वयते पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते ॥ [६०] ॥ चतुष्पादो हि पशवो यङ्कामयेतापशुः स्यादित्यमेदस्कन्तस्मा आ दद्ध्यान्मेदोरूपा वै पशवो रूपेणैवैनम्पशुभ्यो निर् भजत्यपशुरेव भवति यङ्कामयेत पशुमान्थ्

स्यादिति मेदस्वत् तस्मा आ दद्ध्यान्मेदोरूपा वै पशवो रूपेणैवास्मै पशूनव रुन्धे पशुमानेव भवति प्रजापतिर् यज्ञमसृजत स आज्यं ॥ [६१] ॥ पुरस्तादसृजत पशुम्मद्ध्यतः पृषदाज्य-म्पश्चात् तस्मादाज्येन प्रयाजा इज्यन्ते पशुना मद्ध्यतः पृषदाज्येनानूयाजास्तस्मादेतन्मिश्रमिव पश्चाथ्सृष्टꣳ ह्येकादशानूयाजान्यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तमनु यजति घ्नन्ति वा एतत् पशुँय्यँथ् संज्ञपयन्ति प्राणापानौ खलु वा एतौ पशूनाय्यँत् पृषदाज्यय्यँत् पृषदाज्येना नूयाजान्यजति प्राणापानावेव पशुषु दधाति ॥ [६२] ॥

(घ्नन्ति यन्तंखलु चतुरुप ह्वयत आज्यं यत् पृषदाज्येन षट् च) ॥ ११ ॥

## समाप्ति कोर्वैः

(चात्वालाथ् सुवर्गाय यद् वैसर्जनानि वैष्णव्यर्चा पृथिव्यै साद्ध्या इषे त्वे त्यग्निना पर्यग्नि पशोः पशुमालभ्य मेदसा स्रुचा वेकादश)

(चात्वालाद् देवानुपैति मुञ्चति प्रह्रियमाणाय पर्यग्नि पशुमालभ्य चतुष्पादो द्विषष्टिः)

(चात्वालात् पशुषु दधाति)

॥ हरिः ॐ ॥

षष्ठकाण्डे तृतीयः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ६२ |

ॐ